Sey. 1541

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 1541

Title Uttak Gita ane Sadachar Prakarana

1541

Incomplete

C

	Uttar Gita - incomplete and		Title
		Sadachar Raksana - incomplete	Author
			Editor
S( )		Samvat 1932	Year, Vols.
			Publisher
1541			Remarks

ग

नाकं जिव्होपस्थंपरित्यागे पृथिव्याकिंप्रयोजनं ६ तीर्थानितोयपूर्णानिदेवान्पाषाणमृन्मयान् योगिनो
नप्रपद्यंतेआत्मज्ञानपराणाः ७ अग्निर्देवोद्विजातीनांमुनीनांहृदिदैवतं प्रतिमास्वल्पबुधीनांसर्वत्रस
मदर्शिनां ८ सर्वत्रावस्थितंशांतंनप्रपश्येज्जनार्दनं ज्ञानंचक्षुर्विहिनत्वादंधःसूर्यमिवोदितं ९ यत्रयत्रम
नोयातितत्रतत्रपरंपदं तत्रतत्रपरंब्रह्मसर्वत्रसमवस्थितं १० दृश्यंतेदृश्यरूपाणिगगनंभातिनिर्मलं अहंमित्यपरंब्रह्मपरमंविष्णुमव्ययं ११
दृश्यतेचेल खगाकारं खगाकारंविचिंतयेत् सकलंनिष्कलंसूक्ष्मंमोक्षद्वारेणनिर्गतं १२ अपवर्ग
स्यनिर्वाणंपरमंविष्णुमव्ययं सर्वज्योतिनिराकारंसर्वभूताधिवासितं १३ सर्वत्रपरमात्मानं
ब्रह्मात्मापरमव्ययं अहंब्रह्मेतियःसर्वंविजानातिनरःसदा १४ हन्यात्स्वयमिवात्कामान्सर्वाशी
सर्वविक्रयी सर्वनिषिद्धंकृत्वापिकर्मभिर्नसबध्यते १५ निमिषंनिमिषार्धंवाशीताशीतनिवारणं पा

विराजते १३ मौनंचाध्ययनंध्यानंध्येयब्रम्हानुचिंतनं ज्ञाननेत्रतयासम्यक्नित्यःस्वांतःप्रदर्शनं १४ अती
तानागते किंचिन्नस्मरामिनचिंतये रागद्वेषंविनाप्राप्तंभुंजाम्यत्रशुभाशुभं १५ हरन्न्यासोहिसन्न्यासो नवेका
षायवाससा नाहंदेहोहमात्मेतिनिश्चयो ज्ञानलक्षणं १६ अभयंसर्वभूतानांज्ञानमाहुर्मनीषिणः नि
जानंदेस्पृहानान्येवैरागस्यावधिर्मतः १७ वेदांतेश्रवणंकुर्यान्मननंचोपपत्तिभिः योगेनाभ्यसनंनि
त्यंततोदर्शनमात्मनः १८ शब्दशक्तेरचिंत्यत्वाच्छब्दादेवापरोक्षधीः प्रसुप्तःपुरुषोयद्वच्छब्देनैवा
वबुध्यते १९ आत्मानात्मविवेकेन ज्ञानंभवतिनिर्मलं गुरुणाबोधितःशिष्यःशब्दब्रम्हातिवर्तते २०
नत्वंदेहोनेंद्रियाणिनप्राणोमनोनधीः विकारित्वाद्विनाशित्वाद्दृश्यत्वाच्चघटोयथा २१ विशुद्धंकेवलंज्ञानं
निर्विशेषंनिरंजनं यदेकंपरमानंदंतत्त्वमस्यद्वयंपरम् २२ शब्दस्याद्यतयोसिद्धंमनसोपितथैवच म
ध्येसाक्षितयाशिष्टंतदेवत्वंभ्रमंजहि २३ ऐक्यंस्थूलंविराजोश्चसिद्धित्वंसूक्ष्मदृश्ययः अज्ञानमायया

रैक्यंप्रत्यग्बीज्ञानपूर्णयोः२४ चिन्मात्रैकरसो विष्णो ब्रह्मात्मैक्यस्वरूपके भ्रमएवजगव्यातंरज्ज्वांसर्पभ्रमो
यथा२५ कार्याकारणजीवेशौवाच्यावेतौविदुर्बुधाः॥लक्ष्यौचसांख्ययोगाभ्यांवेदांतैरैकतातयो२६का
र्यकारणवाच्यांशौसहज्जिह्रेशयोश्चेतो अजहच्चतयालक्ष्यौचिदंशावेकरूपिणौ२७ कर्मशास्त्रैकुतो
ज्ञानंतर्केनैवास्तिनिश्चयः सांख्ययोगौभिदापन्नौंशाब्दिकाशब्दतत्पराः२८ अन्येपाखंडिनःसर्वेज्ञान
वातसिद्दुर्लभाः एकंवेदांतविज्ञानंस्वानुभूत्याविराजते२९अहंममेत्ययंबंधोनाहंममेतिमुक्तता बंधमोक्षौ
गुणैर्भातौतत्गुणाःप्रकृतिसंभवाः३० ज्ञानमेकंसदाभातिसर्वावस्थासुनिर्मलं मंदभाग्यान्नजानंतिस्वरू
पंकेवलंबृहत ३१ संकल्पसाक्षिणंज्ञानंसर्वलोकैकजीवनं तदेवास्मीतियोवेदसमुक्तोनात्रसंशयः३२
प्रमाताचप्रमाणंचप्रमेयंप्रमितिस्तथा यस्यभासाविभासंतिमानज्ञानायतस्यकिं३३ अर्थाकाराभवे
द्वृत्तिःफलेनार्थःप्रकाशते अर्थज्ञानंविजानातिसएवार्थःपरस्मृतः३४वृत्तिव्याप्त्यत्वमेवास्तुफलव्या

धीःकथंभवेत् स्वप्रकाशःस्वरूपत्वासिध्धत्वाच्च चिदात्मनः ३५ अर्थादर्थे यदावृत्तींर्गुंतुचलतिचांतरे अ
नाधारानिर्विकारायादृशीसोन्मनीस्मृता ३६ चित्तंचिदितिजानियात् तकाररहितंसदा तकारंविषयाध्यानं
जपारागोयथामणौ ३७ ज्ञेयवस्तुपरित्यागाद्ज्ञानंतिष्ठतिकेवलं त्रिपुटीक्षीणतामेति ब्रम्हनिर्वा
णमृछति ३८ मनोमात्रमिदंसर्वंतन्मनोज्ञानमात्रकं अज्ञानंभ्रमइत्याहुर्विज्ञानंपरमंपदं ३९ अज्ञा
नंचान्यथाज्ञानंमायामेतांवदंतितां ईश्वरंमायिनंविद्यात् मायातीतानिरंजनं ४० सदानंदे
चिदाकाशेमायामेघोतडिन्मनः अहंतागर्जनंतत्रधारासारोहिवृत्तयः ४१ माहांमोहांधका
रेस्मिन्देवोवर्षतिलिल

अचलाकेशवेभक्तिर्विभवेः किंप्रयोजनं १६ भिक्षान्नंदेहरक्षार्थंवस्त्रं। शीतनिवारणं अश्मानंचहि
रण्यंचशाकंशाल्योदनंतथा १७ समानंचिंतयेद्योगीयदिचिंत्यमपेक्षते भूतवस्तून्यशोचित्तेपुन
र्जन्मनविद्यते १८ आत्मयोगमयोचद्योभक्तियोग। धिरोमणिं तंवंदेपरमानंदंनंदनंदनमी
श्वरं १९॥ इतीश्रीमदुत्तरगीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादे
श्रीगितामाहात्मनिरूपणयोगोनामतृतीयोध्यायः ३ श्रीसत्यकोटीश्वरार्पणमस्तु संवत १९३२
प्रमोदसंचत् इदंपुस्तकंजडियानाम्
अथसदाचारप्रकरणमारभ्यते॰ ॐ अखंडमंडलाकारंव्याप्तंयेनचराचरं तत्पदंदर्शितंयेनतस्मैश्री
गुरवेनमः॥ सच्चिदानंदकंदायजगदंकुरहेतवे सदोदितायपूर्णायनमोनंतायविष्णवे १ सर्ववेदांतसिद्धां
तैर्ग्रथितंनिर्मलंशिवं सदाचारंप्रवक्ष्यामियोगिनांज्ञानसिद्धये २ प्रातःस्मरामिदेवस्यसवितुर्भर्गआत्मनः

वरेण्यंतद्धियोयोनश्चिदानंदप्रचोदयात् ३ अन्वयव्यतिरेकाभ्यांजाग्रत्स्वप्नसुषुप्तिषु यदेकंकेवलंज्ञानं
तदेवाहंपरंबृहत् ४ ज्ञानाज्ञानविलासोयंज्ञानंज्ञानेनशाम्यति ज्ञानाज्ञानपरित्यज्यज्ञानमेवावशिष्य
ते ५ इतिप्रातःस्मरणं अत्यंतमलिनोदेहोदेहीचात्यंतनिर्मलः असंगोहमितिज्ञात्वाशौचमेतत्प्रचक्षते ६
मन्मनोमीनयन्नित्यंचिहरानंदवारिधौ सुस्नातस्तेनपूतात्मासम्यक्ज्ञानेनवारिणा ७ अथाघम
र्षणंकुर्यात्प्राणापाननिरोधतः मनःपूर्णंसमाधायमग्नःकुंभोयथार्णवे ८ लयविक्षेपयोःसं
धौमनःस्तत्रनिरामिषं ससंधिःसाधितोयेनसमुक्तोनात्रसंशयः ९ सर्वत्रप्राणिनांदेहेजपोभ
वतिसर्वदा हंसःसोहमितिज्ञात्वासर्वबंधैःप्रमुच्यते १० तर्पणंस्वसुखेनैवस्वेंद्रियाणांप्रतर्पणं॥
मनसामनआलोक्यस्वयमात्माप्रकाशते ११ आत्मनिस्वप्रकाशाग्नौचित्तमेकाहुतींहुनेत अग्नि
होत्रीसविज्ञेयोइतरेनामधारकाः १२ देहोदेवालयंप्रोक्तोदेहीदेवोनिरंजनः अर्चितःसर्वभावेनस्वानुभूत्या